9. उपकारहतस्तु कर्तव्यः

[मृच्छकटिक महाकवि शूद्रकविरचित प्रकरण प्रकारनुं रूपक छे. आ रूपकमां समाजना सामान्य स्तरनां पात्रोने लईने कविए कथावस्तु कल्पी छे. नायक तरीके गई कालनो धनिक अने आजनो दरिद्र एवो चारुदत्त छे. नायिका वसन्तसेना नामनी एक धनिक गणिका छे. आ बन्नेना अद्‌भुत प्रणयनी शूद्रके कल्पेली आ कथा संस्कृतसाहित्यनी अजोड कथा छे.

मृच्छकटिकना छेल्ला दसमा अंकमांथी आ नाट्यांश लेवामां आव्यो छे. राजाना साळा शकारे वसंतसेनाने गुंगळावीने मारी नाखी हती. पोते करेली आ हत्यानो आरोप ते चारुदत्त उपर मूके छे. चारुदत्तने फांसीनी सजा थाय छे. नसीबजोगे वसंतसेना जीवती होय छे अने संजोगोवशात् राजसत्तानो पलटो थाय छे. वळी, चारुदत्ते नहि पण शकारे तेनी हत्यानो प्रयत्न कर्यो हतो ते हकीकत प्रकाशमां आवे छे. तेथी हवे सामान्य नागरिक बनेला शकारनी धरपकड करवामां आवे छे. धरपकड करायेला आ शकारने शुं सजा करवी, ते संदर्भे जे संवाद आलेखायो छे, ते संपादित करीने अहीं प्रस्तुत छे.

सत्तास्थाने बेठेला दुष्ट माणसो थोडा वखत माटे भले निर्दोषने पीडा आपी शकता होय, पण छेवटे तो पोते ज पीडाता होय छे. वळी, सज्जन माणस सत्तामां आव्या पछी पोतानुं बूरुं करनारा दुष्ट माणस प्रत्ये बदलानी भावना नथी राखता, परंतु क्षमा तथा उपकारनी भावना राखता होय छे, ए बोध आ संवादमांथी मळे छे. वळी, पोताना मनमां रहेला भावोने अभिव्यक्त करवा माटे संस्कृतमां अव्ययपदोनो जे रीते प्रयोग करवामां आवे छे, तेनो पण अहीं अभ्यास करवानो छे.]

(नेपथ्ये – अरे रे राष्ट्रियश्यालक । एहि एहि । स्वस्य अविनयस्य फलमनुभव ।)

(ततः प्रविशति पुरुषैरधिष्ठितः पश्चाद्‌बाहुबद्धः शकारः ।)

शकारः : (दिशोऽवलोक्य) समन्ततः उपस्थितः एष राष्ट्रियबन्धः । तत्कमिदानीम् अशरणः शरणं व्रजामि । (विचिन्त्य) भवतु, तमेव शरणवत्सलं गच्छामि । (इत्युपसृत्य) आर्यचारुदत्त । परित्रायस्व परित्रायस्व । (इति पादयोः पतति ।)

(नेपथ्ये – आर्यचारुदत्त ! मुञ्च मुञ्च । व्यापादयाम एनम् ।)

शकारः : (चारुदत्तं प्रति) भो अशरणशरण परित्रायस्व ।

चारुदत्तः : (सानुकम्पम्) अहह । अभयम् अभयं शरणागतस्य ।

शर्विलकः : (सावेगम्) आः अपनीयताम् अयं चारुदत्तपार्श्वात् । (चारुदत्तं प्रति) ननूच्यतां किमस्य पापस्य अनुष्ठीयतामिति ।

आकर्षन्तु सुबद्धवैनं श्वभिः संखाद्यताम् अथ ।
शूले वा तिष्ठतामेष पाट्यतां क्रकचेन वा ।।

चारुदत्तः : किमहं यद् ब्रवीमि तत् क्रियते ।

शर्विलकः : कोऽत्र संदेहः ।

शकारः : भट्टारक चारुदत्त शरणागतोऽस्मि । तत् परित्रायस्व । यत्तव सदृशं तत्कुरु । पुनर्न ईदृशं करिष्यामि ।

(नेपथ्ये) (पौराः व्यापादयत । किंनिमित्तं पातकी जीव्यते ।)

शर्विलकः : अरे रे अपनयत । आर्यचारुदत्त आज्ञाप्यताम् किमस्य पापस्य अनुष्ठीयताम् ।



चारुदत्तः : किमहं यद् ब्रवीमि तत्क्रियते ।

शर्विलकः : कोऽत्र संदेहः ।

चारुदत्तः : सत्यम् ।

शर्विलकः : सत्यम् ।

चारुदत्तः : यद्येवं शीघ्रमयम्....।

शर्विलकः : किं हन्यताम् ।

चारुदत्तः : नहि नहि । मुच्यताम् ।

शर्विलकः : किमर्थम् ।

चारुदत्तः : **शत्रुः कृतापराधः शरणमुपेत्य पादयोः पतितः ।**
शस्त्रेण न हन्तव्यः

शर्विलकः : एवम् । तर्हि श्वभिः खाद्यताम् ।

चारुदत्तः : नहि । ..... **उपकारहतस्तु कर्तव्यः ॥**

शर्विलकः : अहो आश्चर्यम् । किं करोमि । वदत्वार्यः ।

चारुदत्तः : तन्मुच्यताम् ।

शर्विलकः : मुक्तो भवतु ।

शकारः : आश्चर्यम् । प्रत्युज्जीवितोऽस्मि । (इति पुरुषैः सह निष्क्रान्तः ।)

ટિપ્પણી

नाम (पुंलिंग) : राष्ट्रियश्यालकः રાજાનો સાળો **शकारः** શકાર (તે સ-ને બદલે શ જ બોલે છે, એથી એનું નામ શકાર પડી ગયું છે.) **राष्ट्रियबन्धः** રાજાનો બંધુ, રાજાનો સગો (સાળો) **भट्टारकः** શેઠ **शूलः** શૂળી, ફાંસી આપવા માટેનો સ્તંભ **क्रकचः** કરવત

(નપુંસકલિંગ) : फलम् ફળ, પરિણામ **शस्त्रम्** હથિયાર (હાથમાં રાખીને વપરાય તે શસ્ત્ર અને ફેંકીને વપરાય તે અસ્ત્ર).

વિશેષણ : अशरणः જેનું કોઈ શરણ નથી તેવો, શરણ વગરનો **शरणागतः** શરણમાં આવેલો **पापः** પાપી **पातकी** પાપ કરનારો, પાપી

સર્વનામ : स्वस्य પોતાનું **एषः** આ (પુંલ્લિંગ) **एनम्** આને **अयम्** આ **यत्** જે (નપુંસકલિંગ) **तत्** તે (નપુંસકલિંગ)

અવ્યય : अरे रे અરે ઓ (આશ્ચર્ય સાથેના સંબોધન માટે વપરાય છે.) **समन्ततः** ચારે બાજુ **तत्** તેથી **इदानीम्** અત્યારે **प्रति** ની તરફ, પ્રત્યે **भोः** કોઈકને સંબોધન કરવા માટે વપરાતો અવ્યય, અભિમુખ કરવા માટે વપરાતો શબ્દ **अहह** દયા પ્રદર્શિત કરવા માટે વપરાય છે. દુઃખ, આશ્ચર્ય, અનુકંપા-કૃપાભાવ બતાવવા માટેનો ઉદ્‌ગાર **आः** ગુસ્સો કે અણગમો પ્રદર્શિત કરવા માટે વપરાય છે, ક્રોધ બતાવવા માટેનો ઉદ્‌ગાર **ननु** આજ્ઞા મેળવવાનો ઇરાદો વ્યક્ત કરવા માટે વપરાય છે **शीघ्रम्** જલદી, ઉતાવળે **नहि** ન **तर्हि** તો **अहो** આશ્ચર્ય સૂચવવા માટે વપરાય છે, આશ્ચર્યનો ઉદ્‌ગાર

કૃદન્ત : अवलोक्य (अव + लोक् + त्वा > य) । **सुबद्ध्वा** (सु + बन्ध् + त्वा) । **उपसृत्य** (उप + सृ + त्वा > य)

સમાસ : शरणागतस्य (शरणम् आगतः, तस्य । द्वितीया तत्पुरुष) । चारुदत्तपार्श्वात् (चारुदत्तस्य पार्श्वम् तस्मात् । षष्ठी तत्पुरुष) उपकारहतः (उपकारेण हतः । तृतीया तत्पुरुष) ।

ક્રિયાપદ : ષષ્ઠ ગણ (પરસ્મૈપદ) **प्र + विश्** (**प्रविशति**) પ્રવેશવું, દાખલ થવું

વિશેષ

(1) શબ્દાર્થ : पुरुषैरधिष्ठितः માણસોથી રક્ષાયેલો, રાજાના માણસોથી દેખરેખ રખાયેલો **पश्चाद्‌बाहुबद्धः** જેના હાથ પાછળ બાંધેલા છે તેવો **अभ्युपपन्नशरणवत्सलम्** શરણમાં આવેલાને વહાલ-પ્રેમ કરનારને **परित्रायस्व** બચાવો. **मुञ्च** છોડી દો. **अशरणशरण** જેનું કોઈ શરણ નથી તેનું શરણ **व्यापादयामः** અમે મારી નાંખીએ છીએ. **सानुकम्पम्** અનુકંપા-દયા સાથે **सावेगम्** આવેગ-ક્રોધ સાથે **अपनीयताम्** દૂર લઈ જાવ. દૂર હઠાવો. **किम् अनुष्ठीयताम्** શું કરવામાં આવે ? **आकर्षन्तु** ખેંચવામાં આવે ? **श्वभिः** કૂતરાઓથી **संखाद्यताम्** (ફાડી) ખવડાવવામાં આવે ? **तिष्ठताम्** ઊભો રાખવામાં આવે ? **पाट्यताम्** વહેરાવી દેવાય ? **तत् क्रियते** તે કરવામાં આવે. **तत्कुरु** તે કરો. **पौराः** પુરમાં રહેનારા માણસો, નગરજનો **व्यापादयत** મારી નાંખો. **जीव्यते** જિવાડી રાખ્યો છે. **अपनयत** દૂર લઈ જાઓ. **आज्ञाप्यताम्** આજ્ઞા આપો. આદેશ કરો. **किं हन्यताम्** શું મારી નાખવામાં આવે ? **मुच्यताम्** છોડી દો. મુક્ત કરો. **कृतापराधः** કર્યો છે અપરાધ જેણે, અપરાધી માણસ **प्रत्युज्जीवितोऽस्मि** જીવતો ઉગારી લેવામાં આવ્યો છું. જીવતો રહ્યો છું.

સ્વાધ્યાય

1. અધોલિખિતેભ્યः વિકલ્પેભ્યः સમુચિતમ્ ઉત્તરં ચિનુત ।

(1) पुरुषैरधिष्ठितः शकारः कीदृशः आसीत् ?

(ક) पाशबद्धः (ખ) पश्चाद्‌बाहुबद्धः (ગ) प्रसन्नः (ઘ) दुःखितः

(2) 'किमहं यद् ब्रवीमि तत् क्रियते' इति वचनम् कस्य ?

(ક) नगरजनस्य (ખ) शर्विलकस्य (ગ) शकारस्य (ઘ) चारुदत्तस्य

(3) 'एवम् तर्हि श्वभिः खाद्यताम् ।' एतद् वाक्यं कः वदति ?

(ક) शूद्रकः (ખ) चारुदत्तः (ગ) शर्विलकः (ઘ) शकारः

(4) शकारः - आश्चर्यम् ..... अस्मि ।

(क) जीवितः (ख) प्रत्युज्जीवितः (ग) उज्जीवितः (घ) मुक्तः

(5) कः ..... सन्देहः ?

(क) ततः (ख) यतः (ग) अत्र (घ) इतः

(6) सः ..... सह निर्गच्छति ।

(क) पुरुषैः (ख) पुरुषं (ग) पुरुषस्य (घ) पुरुषः

(7) शर्विलकः ..... प्रति पश्यति ।

(क) चारुदत्ताय (ख) चारुदत्तं (ग) चारुदत्तेन (घ) चारुदत्तात्

(8) यदि एवं ..... श्वभिः खाद्यताम् ।

(क) तदा (ख) यत्र (ग) तत्र (घ) तर्हि

2. रेखाङ्कितपदानां समासप्रकारं लिखत ।

(1) अहह । अभयम् अभयं शरणागतस्य ।

(2) आः अपनीयताम् अयं चारुदत्तपार्श्वात् ।

(3) उपकारहतः कर्तव्यः ।

3. संस्कृतभाषया उत्तरं लिखत ।

(1) शकारः चारुदत्तम् उपसृत्य किं कथयति ?

(2) नेपथ्ये पौराः किं कथयन्ति ?

(3) कृतापराधः शत्रुः यदि शरणमुपेत्य पादयोः पतितः तदा किं करणीयम् ?

(4) उपकारेण कः हतः ?

4. उदाहरणानुसारं शब्दरूपैः रिक्तस्थानानि पूरयत ।

उदाहरणम् -

	पुरुषेण	पुरुषाभ्याम्	पुरुषैः
(1)	पापस्य	.....	.....
(2)	.....	पादयोः	.....
(3)	.....	.....	पौराः
(4)	आर्यचारुदत्तम्	.....	.....
(5)	मुक्तः	.....	.....

5. मातृभाषया उत्तराणि लिखत ।

(1) શકારે શેનું ફળ ભોગવવાનું છે ?

(2) શકાર હવે ચારુદત્તને કયા રૂપમાં જુએ છે ?

(3) શર્વિલક શકારને કેવો દંડ આપવાનું વિચારે છે ?

પ્રવૃત્તિઓ

- મૃચ્છકટિકમ્નું કથાવસ્તુ વાંચો.
- વર્ગમાં આ નાટ્યાંશ વાચિક અભિનય સાથે રજૂ કરો.